श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकादशः सर्गः ॥


*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकादशः सर्गः ॥

## **रावणस्य तत्सभासदां च संसदि समवायः**

स बभूव कृशो राजा मैथिलीकाममोहितः।
असन्मानाच्च सुहृदां पापः पापेन कर्मणा ॥ **6.11.1** ॥

अतीव कामसम्पन्नो वैदेहीमनुचिन्तयन्।
अतीतसमये काले तस्मिन् वै युधि रावणः।
अमात्यैश्च सुहृद्भिश्च प्राप्तकालममन्यत ॥ **6.11.2** ॥

स हेमजालविततं मणिविद्रुमभूषितम्।
उपगम्य विनीताश्वमारुरोह महारथम् ॥ **6.11.3** ॥

तमास्थाय रथश्रेष्ठं महामेघसमस्वनम्।
प्रययौ रक्षसां श्रेष्ठो दशग्रीवः सभां प्रति ॥ **6.11.4** ॥

असिचर्मधरा योधाः सर्वायुधधरास्ततः।
राक्षसा राक्षसेन्द्रस्य पुरस्तात् सम्प्रतस्थिरे ॥ **6.11.5** ॥

नानाविकृतवेषाश्च नानाभूषणभूषिताः।
पार्श्वतः पृष्ठतश्चैनं परिवार्य ययुस्तदा ॥ **6.11.6** ॥

रथैश्चातिरथाः शीघ्रं मत्तैश्च वरवारणैः।
अनूत्पेतुर्दशग्रीवमाक्रीडद्भिश्च वाजिभिः ॥ **6.11.7** ॥

गदापरिघहस्ताश्च शक्तितोमरपाणयः।
परश्वधधराश्चान्ये तथान्ये शूलपाणयः।
ततस्तूर्यसहस्राणां सञ्जज्ञे निःस्वनो महान्॥ **6.11.8** ॥

तुमुलः शङ्खशब्दश्च सभां गच्छति रावणे।
स नेमिघोषेण महान् सहसाभिनिनादयन्॥ **6.11.9** ॥

राजमार्गं श्रिया जुष्टं प्रतिपेदे महारथः।
विमलं चातपत्रं च प्रगृहीतमशोभत॥ **6.11.10** ॥

पाण्डुरं राक्षसेन्द्रस्य पूर्णस्ताराधिपो यथा।
हेममञ्जरिगर्भे च शुद्धस्फटिकविग्रहे॥ **6.11.11** ॥

चामरव्यजने तस्य रेजतुः सव्यदक्षिणे।
ते कृताञ्जलयः सर्वे रथस्थं पृथिवीस्थिताः॥ **6.11.12** ॥

राक्षसा राक्षसश्रेष्ठं शिरोभिस्तं ववन्दिरे।
राक्षसैः स्तूयमानः सञ्जयाशीर्भिररिन्दमः॥ **6.11.13** ॥

आससाद महातेजाः सभां विरचितां तदा।
सुवर्णरजतास्तीर्णां विशुद्धस्फटिकान्तराम्॥ **6.11.14** ॥

विराजमानो वपुषा रुक्मपट्टोत्तरच्छदाम्।
तां पिशाचशतैः षड्भिरभिगुप्तां सदाप्रभाम्॥ **6.11.15** ॥

प्रविवेश महातेजाः सुकृतां विश्वकर्मणा।
तस्यां तु वैदूर्यमयं प्रियकाजिनसंवृतम्॥ **6.11.16** ॥

महत्सोपाश्रयं भेजे रावणः परमासनम्।
ततः शशासेश्वरवद्दूतान् लघुपराक्रमान्॥ **6.11.17** ॥

समानयत मे क्षिप्रमिहैतान् राक्षसानिति।
कृत्यमस्ति महज्जाने कर्तव्यमिति शत्रुभिः॥ **6.11.18** ॥

राक्षसास्तद्वचः श्रुत्वा लङ्कायां परिचक्रमुः।
अनुगेहमवस्थाय विहारशयनेषु च।
उद्यानेषु च रक्षांसि चोदयन्तो ह्यभीतवत्॥ **6.11.19** ॥

ते रथान्तचरा एके दृप्तानेके दृढान् हयान्।
नागानेकेऽधिरुरुहुर्जग्मुश्चैके पदातयः॥ **6.11.20** ॥

सा पुरी परमाकीर्णा रथकुञ्जरवाजिभिः।
सम्पतद्भिर्विरुरुचे गरुत्मद्भिरिवाम्बरम्॥ **6.11.21** ॥

ते वाहनान्यवस्थाय यानानि विविधानि च।
सभां पद्भिः प्रविविशुः सिंहा गिरिगुहामिव॥ **6.11.22** ॥

राज्ञः पादौ गृहीत्वा तु राज्ञा ते प्रतिपूजिताः।
पीठेष्वन्ये बृसीष्वन्ये भूमौ केचिदुपाविशन्॥ **6.11.23** ॥

ते समेत्य सभायां वै राक्षसा राजशासनात्।
यथार्हमुपतस्थुस्ते रावणं राक्षसाधिपम्॥ **6.11.24** ॥

मन्त्रिणश्च यथामुख्या निश्चितार्थेषु पण्डिताः।
अमात्याश्च गुणोपेताः सर्वज्ञा बुद्धिदर्शनाः॥ **6.11.25** ॥

समीयुस्तत्र शतशः शूराश्च बहवस्तथा।
सभायां हेमवर्णायां सर्वार्थस्य सुखाय वै॥ **6.11.26** ॥

ततो महात्मा विपुलं सुयुग्यं
    रथं वरं हेमविचित्रिताङ्गम्।

शुभं समास्थाय ययौ यशस्वी
विभीषणः संसदमग्रजस्य ॥ **6.11.27** ॥

स पूर्वजायावरजः शशंस
नामाथ पश्चाच्चरणौ ववन्दे।
शुकः प्रहस्तश्च तथैव तेभ्यो
ददौ यथार्हं पृथगासनानि ॥ **6.11.28** ॥

सुवर्णनानामणिभूषणानां
सुवाससां संसदि राक्षसानाम्।
तेषां परार्घ्यागुरुचन्दनानां
स्रजां च गन्धाः प्रववुः समन्तात् ॥ **6.11.29** ॥

न चुक्रुशुर्नानृतमाह कश्चित्
सभासदो नापि जजल्पुरुच्चैः।
संसिद्धार्थाः सर्व एवोग्रवीर्या
भर्तुः सर्वे ददृशुश्चाननं ते ॥ **6.11.30** ॥

स रावणः शस्त्रभृतां मनस्विनां
महाबलानां समितौ मनस्वी।
तस्यां सभायां प्रभया चकाशे
मध्ये वसूनामिव वज्रहस्तः ॥ **6.11.31** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकादशः सर्गः ॥